# .. jvara rachita kRiShNastotra ..

## ॥ ज्वर रचित कृष्णस्तोत्र ॥

श्री गणेशाय नमः ।
ज्वर उवाच ।
नमामि त्वाऽनन्तशक्तिं परेशं सर्वात्मानं केवलं ज्ञप्तिमात्रम् ।
विश्वोत्पत्तिस्थानसंरोधहेतुं यत्तद्ब्रह्म ब्रह्मलिङ्गं प्रशान्तम् ॥ १॥
कालो दैवं कर्म जीवः स्वभावो द्रव्यं क्षेत्रं प्राण आत्मा विकारः ।
तत्संघातो बीजरोहप्रवाहस्त्वन्मायैषा तन्निषेधं प्रपद्ये ॥ २॥
नानाभावैर्लीलयैवोपपन्नैर्देवान्साधून् लोकसेतून्बिभर्षि ।
हंस्युन्मार्गान् हिंसया वर्तमानान् जन्मैतत्ते भारहाराय भूमेः ॥ ३॥
तप्तोऽहं ते तेजसा दुःसहेनं शान्तोग्रेणात्युल्बणेन ज्वरेण ।
तावत्तापो देहिनां तेऽन्घ्रिमूलं नो सेवेरन्यावदाशानुबद्धाः ॥ ४॥
श्रीभगवानुवाच ।
त्रिशिरस्ते प्रसन्नोऽस्मि व्येतु ते मज्ज्वराद्भयम् ।
यो नो स्मरति संवादं तस्य त्वन्न भवेद्भयम् ॥ ५॥
इत्युक्तोऽच्युतमानस्य गतो माहेश्वरो ज्वरः ।
बाणस्तु रथमारूढः प्रागाद्योत्स्यन् जनार्दनम् ॥ ६॥
॥ इति श्रीमद्भागवते ज्वरकृतं कृष्णस्तोत्रं सम्पूर्णम् ॥

Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

Please send corrections to sanskrit@cheerful.com
Last updated January 17, 2005